कर्म-धारिणि!, कामेशि! जिह्वया वद वद, मनसा रम रम, क्रन्द क्रन्द, वस वस। बिन्दु-प्रिये! हूं हूं हूं हूं रद रद। शारद-शशाङ्क-निकाशे!, शारदे!, विद्या-दान-विशारदे! क्लीं गण-नायिके!, आनन्द-मय-विग्रहे!, गृहीत-पूर्ण-कपाले!, ज्वलज्जिह्वे!, ह्लादिनि!, नित्य-क्लिन्ने!, मद-द्रवे! स्वाहा।

सौं सौं क्षूं सरस्वत्यै नमः। मदिरे!, मधु - मति!, मदाभोग - सुभगे!, भग-माले! मुरु मुरु, चुरु-चुरु, धुन धुन, स्फुर स्फुर, स्फोटय स्फोटय, घण्टा-रवेण निरन्तर-पर-बल-भेदिनि! फ्रें कुब्जिकायै ह्रां ह्रीं ञणङ्मे अघोर-मुखि! किणि किणि, विच्चे, ऐं ह्रीं श्रीं फ्रें ह्रीं हुं फट्। सर्वज्ञे! जम्भ जम्भ, जन्म - जरा-मरण-दारिद्र्य-घातिनि!, सर्व - सिद्धि - निधाने!, महा-भय-धारिणि! ॐ हंसः हुं फट् । विद्येश्वरि! ज्रां ज्रीं ज्रूं ज्रैं ज्रौं ज्रः, ल्रीं प्रीं सौः, स्रौं क्ष्रौं। क्षुद्र-विद्राविणि!, विद्रुत-विद्रुम-प्रभे! क्षम्रीं हौंः। चण्डि!, चण्डेश्वरि!, ब्रह्माण्ड-माला - धारिणि!, बन्धूक - शोणाधरे!, त्रैलोक्य सत्ये! नमः, प्रसीद प्रसीद, ऐं श्रीं फ्रें सौः ऐं ह्रीं श्रीं श्रीमहा-त्रिपुर-सुन्दरि! स्वाहा।

।। श्रीत्रिपुर-सुन्दर्युपस्थान-सहस्राक्षरी ।।

★★★

## अपराध-क्षमापण-स्तोत्रम्

किं किं द्वन्द्वं दनुज-दलिनि! क्षीयते न श्रुतायाम् ।
का का सिद्धिः कुल-कमलिनि! प्राप्यते नार्चितायाम् ।।
का का कीर्तिः सुर-वर-नुते! व्याप्यते न स्तुतायाम् ।
कं कं भोगं त्वयि न चिनुते चित्तमालम्बितायाम् ।।
सकुसं सकुसं रम्भ स्वारिता मोक्ष - विभ्रमे!
चिच्चन्द्र - मण्डलान्तःस्थे नमस्ते हर - वल्लभे ।।
जगदुद्धारणोद्योग - योग - भोग - वियोगिनि!
स्थिति-भाव-स्थिते देवि! नमः स्थाणु-प्रियेऽम्बिके ।।
भावाभाव - पृथग् - भानानुभावे वेद - कर्मणि ।
चैतन्य - पञ्चके देवि! नमस्तुभ्यं हराङ्गने ।।
सृष्टि - स्थित्युप - संहार - प्रत्युर्जित - पद - द्वये!
चिद्-विश्रान्ति-महा-सत्ता-मात्रे! मातर्नमोऽस्तु ते ।।

वह्न्यर्क - शीत - किरण - ब्रह्म - चक्रान्तरोदिते!
चतुष्पीठेश्वरि!, शिवे! नमस्ते त्रिपुरेश्वरि! ।।
चराचरमिदं विश्वं प्रकाशयसि तेजसा ।
मातृका - रूपमास्थाय तस्यै मातर्नमोऽस्तु ते ।।
स्मृता भव - भयं! हंसि पूजिताऽसि शुभङ्करि! ।
स्तुता त्वं वाञ्छितं वस्तु ददासि करुणा-वरे ।।
भक्तस्य नित्य - पूजायां रतस्य मम साम्प्रतम् ।
वाग्भवादि - महा - सिद्धिं देहि त्रिपुर-सुन्दरि! ।।
परमानन्द - सन्दोह - प्रमोद - भर - निर्भरे!
दुःख-त्रय-पर - परिम्लान - वदनं पाहि मां शिवे! ।।
शब्द - ब्रह्म - मयि यच्च देवि!, त्रिपुर-सुन्दरि!
यथा - शक्ति जपं पूजां गृहाण मदनुग्रहात् ।।
अज्ञानादल्प - बुद्धित्वादालस्याद् दुष्ट - भावतः ।
ममापराधं कार्पण्यं क्षमस्व पर - देवते! ।।
अज्ञानामसमर्थानामस्वस्थान - निवासिनाम् ।
अशुद्धं बलमस्माकं शिशूनां हर - वल्लभे! ।।
कृपा - मयि! कृपां भद्रे! सकृन्मयि निवेशय ।
तावदऽहं कृतार्थोऽस्मि न ते किञ्चन हीयते ।।
यन्मया क्रियते कर्म जाग्रत् - स्वप्न - सुषुप्तिषु ।
तत्-सर्वं तावकी पूजा भूयाद् भूत्यै रमे! शिवे! ।।
द्रव्य-हीनं क्रिया-हीनं विधि-हीनं च यद् भवेत् ।
तत् - सर्वं कृपया देवि! क्षमस्व पर - देवते! ।।
यन्मयोक्तं महा - ज्ञानं तन्महत् स्वल्पमेव वा ।
तावत् सर्वं जगद्धात्रि! क्षन्तव्यमयमञ्जलिः ।।

।। श्रीत्रिपुरार्णवे अपराध-क्षमापण-स्तोत्रम् ।।

★★★